Shodhshauryam, International Scientific Refereed Research Journal
© 2021 SHISRRJ | Volume 4 | Issue 2 | ISSN : 2581- 6306

# वर्णव्यवस्थाया: शैक्षिकनिहितार्थ:

**डॉ. दिनेशकुमारयादव:**
सहायकाचार्य:, श्रीलालबहादुरशास्त्रीराष्ट्रीय, संस्कृतविश्वविद्यालय:, नवदेहली

**Article Info**
Volume 4, Issue 2
Page Number : 214-218
**Publication Issue :**
March-April-2021
**Article History**
Accepted : 01 April 2021
Published : 25 April 2021

भारतवर्षे वर्णव्यवस्थाया: प्रारम्भ: वैदिककालादेव मन्यते।

**ब्राह्मणोऽस्य मुखमारीद्बाहू राजन्यः कृतः।**
**उरू तदस्य यद्वैश्य: पद्भ्यां शूद्रोऽजायत।।**[1]

अत्र समाजस्य कल्पना पुरुषसरूपेण कृता वर्तते। अर्थात् मानवशरीरस्य अङ्गानामिव। यथा शरीरस्य अङ्गानि कार्यं कुर्वन्ति तथैव एतानि वर्णानि समाजे स्वकर्तव्यम् निर्वहन्ति। तेन सम्पूर्णसमाजस्य कार्यव्यवहारः सम्यक् प्रचलति। वर्णशब्दस्य निष्पत्ति: 'वृज वरणे' धातुना अभवत् । यस्यार्थोऽस्ति - वरणं चयनं वा। प्रारम्भिककाले वर्णव्यवस्थायाः आधारः कर्म एवासीत्, यस्य प्रमाणं मनुस्मृतौ विद्यते

**जन्मना जायते शूद्रः संस्काराद् द्विज उच्यते।**
**स्वाध्यायेन जपैहौमैस्त्रौविद्येनज्ययासुतैः ।**
**महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः।।**[2]

यजुर्वेदेऽपि चतुर्णां वर्णानां परिगणना तेषां कर्मानुगुणमेव कृता-

**ब्रह्मणे ब्राह्मणं क्षत्राय राजन्यं मरूद्भयो वैश्यं तपसे शूद्रम।**[3]

ब्राह्मणस्य नाम मङ्गलयुक्तः, क्षत्रियस्य बलयुक्तः, वैश्यस्य धनसूचकः, शूद्रस्य च सेवासूचकः संबोधित: वर्तते। महाभारतेऽपि उक्तम्-

**ब्राह्मणो जायमानो हि पृथिव्यामधिजायते ।**
**ईश्वरः सर्वभूतानां धर्मकोशस्य गुप्तये।।**
**अतः पृथिव्या यन्तारं क्षत्रियं दण्डधारिणम्.**
**शूद्रो ह्येतान् परिचरेदिति ब्राह्मणानुशासनम्।।**[4]

ब्रह्मज्ञातारं ब्राह्मणः उक्तं नो चेद् तं ब्रह्म-मूढो एव कथ्यते। यथा-

**अनुभूतिं विना मूढो वृथा ब्रह्मणि मोदते ।**
**प्रतिबिम्बितशाखाग्रफलास्वादनमोदवत् ॥**[5]
**तस्मादपि दीक्षितं राजन्यं वा वैश्यं वा ब्राह्मण।**
**इत्येव ब्रूयाद् ब्राह्मणो हि जायते यो यज्ञाज्जायते ।।**[6]

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

अर्थात् दीक्षितं क्षत्रियं वैश्यं वा ब्राह्मणः एव कथयेत्। यतोहि यः जानाति ब्रह्म सः ब्राह्मणः । ब्रह्मज्ञाता तु कस्यापि वर्णस्य मानवः भवितुं शक्नोति। यतः ब्रह्मज्ञाता, पूर्णगुरुः एव स्वशिष्यं बोधयाति, दार्शयति च यत् परब्रह्मपरमात्मा अस्माकं हृदये एव निवसति। एवं ज्ञात्वा दृष्ट्वा च शिष्यः स्वगुरुणा दर्शितं मार्गम् अनुसरति तस्य आज्ञां च परिपालयति ।

**ब्राह्मणो व्रतचारिणः।**[7]

**ब्राहाण:-**

**एष ह वै सान्तपनोऽग्निर्यद् ब्राह्मणो यस्य गर्भाधानपुंस वनसीमन्तोन्नयनजातकर्म- नामकरण- निष्क्रमण- अन्नप्राशन- गोदान-चुड़ाकरण- उपनयन- आप्लावन- अग्निहोत्र- व्रतचर्यादीनि कृतानि भवन्ति स सन्तपनः।।**[8]

अर्थात् ब्राह्मणः सर्वेभ्यः संस्कारेभ्य युक्तः सान्तपनं धारिन् च भवति। छान्दोग्योपनिषदि उक्तं- यत् ज्ञाने श्रेष्ठं भवितुं प्रज्ञायाः शुद्धता परमावश्यकी भवति।

**आहारशुद्धौ सत्वशुद्धि: सत्वशुद्धौ ध्रुवास्मृतिः ।**[9]

अर्थात् शुद्धबुद्धिः तु केवलं ब्राह्मणस्य एव भवति यतोहि सः ब्रह्म जानति। यदा सः स्वकीयान्तर्जगति ध्यानस्य माध्यमेन प्रविशति तदा सः लोकत्रयाणां ज्ञानं प्राप्नोति अर्थात् तम् लोकत्रयाणां ज्ञाता कथ्यते। अत एवोक्तमपि-

**त्रयो लोकः संगिता ब्राह्मणेन द्यौरेवासौ पृथित्यन्तरिक्षम्।**[10]

**क्षत्रियः-**

क्षत्रियस्य व्युत्पत्ति: वर्तते- 'क्षतात् त्रायते इति क्षत्रियः' । क्षत्रियं ब्राह्मणाद् कनिष्ठं मन्यते-

**भूयान्वै ब्राहाणः क्षत्रियादिति वरुण उवाच ।**[11]

**'राजा सर्वस्येष्ठे ब्राह्मणवर्जम्'**[12]

परञ्च क्षत्रियराजाराजकार्यं ब्राह्मणस्य मार्गदर्शनेन करोति स्म। कथ्यते अनेन कारणेनैव राज्ञः उत्साहः, आत्मविश्वासश्च खण्डितः न भवति स्म ।

**न वै ब्राह्मणो राज्यायालम् ।**[13]

ब्राह्मण: क्षत्रियश्च परस्परं पूरकौ इति कथ्यते स्म।

**तत्तदवलृप्तमेव । यद् ब्राह्मणो राजन्यः स्याद्यद्युराजानं लभेत समृद्धं तदेतद त्वेवानवक्लृप्तंयत्क्षत्रियो ब्राह्मणो भवति युद्ध किंच कर्म्यं कुरुते प्रसृतं ब्राह्मणा मित्रेण न हैवास्मै तत्समृध्यते तस्माद्, क्षत्रियेण कर्म करिष्यमाणेनोपसर्तव्य एव ब्राह्मण: सं हैवास्मै तद् ब्राह्मप्रसूतं कर्मऽर्ध्यते।**[14]

अर्थात् ब्राह्मण: राज्ञां विना भवितुं शक्नोति परमेतत् अयुक्तमेवास्ति यत् क्षत्रिय: (राजा) ब्राह्मणेन विना भवेत्।

**तस्माद्राजा बाहुबली भावुकः।**[15]

अर्थात् बाहुबलयुक्त: जङ्घासु शक्तिमान् क्षत्रियः राजा एव प्रिय: भवति। यतोहि शक्तिमान् राजा एव स्वप्रजां बाह्याक्रमणेभ्य: रक्षितुं शक्नोति। सः एव स्वकीये राज्ये शान्तिं स्थापयितुं शक्नोति ।

**राजाभिर्धृतदण्डास्तु कृत्वा पापनि मानवाः ।**

**निर्मालाः स्वर्गभापान्तिसन्तः सुकृतिनो यथा। ।।16।।**

अर्थात् राजा न्यायपूर्वकं दण्डं ददाति तु सः पापिन: कल्याणं करोति।

**वैश्यः-**

समाजं ज्ञानं शक्तिं च ब्राह्मणवर्णेन, रक्षायाः साधनं क्षत्रियवर्णेन, अधुना वैश्यवर्ण: कृषि-गोरक्षा-वाणिज्येन च अर्थसंग्रहं कुर्वन् समग्रसमाजम् अर्थसङ्कटात् मुक्तिप्रदानस्य साधनरूपमस्ति ।

**"राष्ट्रांगण से विश: "**[17]

अर्थात् वैश्यान् एव राष्ट्रं कथ्यते। यतोहि अर्थबलमेव राष्ट्रस्य प्रतिष्ठा अस्ति। अत: अर्थप्रधानवैश्यवर्णमेव समाजस्य प्रधानशरीरं मन्यते। अर्थचिन्तातः त्राणार्थम् समाजे वैश्यवर्णस्य प्रादुर्भाव: जातः। अतः धनसम्बन्धे तु वैश्यमेव श्रेष्ठ: कथ्यते स्म।

**श्रेष्ठं नाग धनं गुणाश्चास्य सन्तीति श्रेष्ठी |**

**विनायकः श्रेष्ठी कश्चिद्धनप्रातिः ।।**[18]

इत्थं स्पष्टमस्ति यत् आर्थिकावश्यकतानां कारणेन वैश्यवर्णस्य प्रादुर्भावः जातः। हद्दय: वैश्यवर्ण: आर्थिकरूपेण सम्पन्न: भवति स्म। ताण्ड्यब्राह्मणे प्रतिपादितमस्ति यत् वैश्य: अन्यैयुक्तभवनापि क्षीणं न भवति, यतोहि अस्योत्पत्तिः प्रजापतेः प्रजननेन्द्रियात् अभवत्।[19] अत एव एतस्य पार्श्वे बहुसंख्यका: पशवः सन्ति सर्वे देवा: एतस्य संरक्षकाः सन्ति।

वैदिककाले वैश्यान् यज्ञस्य वेदाध्ययनस्य च अधिकारः आसीत्। ब्राह्मणानां क्षत्रियाणामिव तेषामपि उपनयनसंस्कार: भवति स्म। अनेनैव कारणेन द्विजन्मनः परिभाषायां एतेषां स्थानमासीत्। 'ऐतरेयब्राह्मणे' याज्ञिकं कृत्याणां सम्पादने एतेषाम् सहयोगमावश्यकं मन्यते।[20]

**शूद्रः-**

प्राचीनभारतीयवर्णव्यवस्थायां चतुर्थं स्थानं 'शूद्रस्यास्ति।' शूद्रस्योल्लेख: सर्वप्रथमं ऋग्वेदस्य पुरुषसूक्ते प्राप्नोति।[21] प्राचीनकाले शूद्राय अत्यधिकम् आदरं न दीयते स्म। सः ब्राह्मण-क्षत्रिय-वैश्येभ्य: एतेभ्यः त्रिभ्य: हीनः अवगम्यते स्म। शूद्रशब्दस्य निष्पत्तिः 'शुच्"द्रु" एताभ्यां द्वाभ्यां धातुभ्यां मन्यते। यस्यार्थोऽस्ति यत् यः शोकाकुलं भूत्वा इतस्ततः विचरति, यः निर्बलं निस्तेजः चास्ति सः एव शूद्रोऽस्ति। यथा-

**शोचन्तश्च द्रवन्तश्च परिचर्यासु ये रताः ।**

**निस्तेदसाल्पवीर्याश्च शूद्रास्तानब्रवीत् स।।**[22]

शूद्रस्य धर्म: सेवा एव कथ्यते। तस्योत्पत्तिः परमपुरुषस्य पादाभ्याम् मन्यते-

**तस्मात्पादावनेज्यन्नातिं वर्द्धते पत्तौ विसृष्टः।**[23]

अत एवोक्तं यत् शूद्रान् वैदिककर्मकाण्डात् पृथक् करणस्य कानिचित् कारणानि वर्णितानि आसन्।

आर्थिकप्रगतिकारणतः समाजिकविभाजं, यज्ञानां स्वरूपं च परिवर्तितं जातम्। यस्य फलस्वरूपं यज्ञाः अतिविस्तृताः दुष्काराः व्ययपूर्णाश्च च अभवन्| कालक्रमेण यज्ञः उच्चवर्णानां विशेषाधिकारः जातः। यतोहि तेषामेव पार्श्वे ऐतेषां विस्तृतानां यज्ञानां सम्पादनस्य साधनानि भवन्ति स्म। महाभारते युधिष्ठिरः अपि स्पष्टम् उक्तवान् -

**न ते शक्या दरिद्रेणयज्ञाः प्राप्तुं पितामह, बहुपकरणा यज्ञा नानस्म्भारविस्तारा:। पार्थिवैर्राजपुत्रैर्वा शक्या: प्राप्तुं पितामह, नार्थ न्यूनैरवगुणैरेकात्मभिर संहतैः।।**[24]

याज्ञिक: धर्मः निर्धनाणां, सामर्थ्यात् परमस्ति। अर्थात् आर्थिकदशा सम्यक् न भूते सति शूद्रा: यज्ञेषु व्ययार्थम् असमर्था: आसन्।

**धर्मचर्यया जघन्यो वर्णः पूर्वं पूर्वं वर्णमापद्यते जातिपरिवृन्तौ ।**
**अधर्मचर्यथा पूर्वो वर्णो जघन्यं वर्णमापद्यते जातिपरिवृतौ ॥**[25]

अत्र एतत् ध्यातव्यमस्ति यत् जाते: आधार: जन्म अस्ति। परन्तु वर्णस्य आधार: मनुष्यकृतं कर्म अस्ति। अर्थात् मनुष्यः कर्माणुसारेण श्रेष्ठाश्रेष्ठ: भवति। अत एव मनुष्यः स्वकीये जीवने सद्कर्म कुर्यात्, स्वकीयं लक्ष्यं प्रति वर्धेत् च। यतोहि 'शूद्राज इन ऐनसियंट इण्डिया' नामके पुस्तके वर्णितमस्ति यत् 'सम्पन्नाः शूद्राः यज्ञानाम् अधिकारिणः अपि अभविष्यन्।[26]

शूद्राणां धार्मिककृत्येभ्यः बहिष्कारस्य मुख्यकारणं तेषाम् आचारसम्बन्धिनी अशुद्धताऽऽसीत्। आलोच्य ब्राह्मणसाहित्ये एतत् सङ्केतमस्ति यत् 'कवष:' स्वकीया तपोमय: साधनया शुद्रकत्वात् मुक्तिं प्राप्य श्रौत यज्ञे स्थानं प्राप्तवान्|[27]

एतेन सङ्केतेन स्पष्टं भवति यत् आचारशुद्ध: शूद्रः यज्ञकृत्यानां सम्पादनस्य अधिकारी मन्यते। शुनः शेपस्य आख्यानेन स्पष्टमस्ति यत् विश्वामित्र: स्वपुत्रान् शापयन् आचारस्य अशुद्धतां प्रति सङ्केतं कृतवान।[28]

एतेन स्पष्टं भवति यत् कस्यापि वर्णस्य मानवः स्वकीयकर्मनुसारेण शुद्धाशुद्धः भवितुं शक्नोति। तदनुसारमेव स: ब्राह्मण: क्षत्रिय:, वैश्यः, शूद्रश्च भवेत्।

अत: मानवाय उचितमस्ति यत् स: वर्णाश्रमधर्मस्य पालनं कुर्यात्, सम्पूर्ण जीवनं सांसारिकक्लेशानाम् अपशमनं कुर्यात्। पूर्णगुरोः शरणागतिं गत्वा स्वजीवनस्य लक्ष्यं साधयेत्, ब्रह्मज्ञानं च प्राप्नुयात्। येन जन्म-मरणस्य बन्धनात् मुक्तिं प्राप्नुयात्।

**ब्रह्मचर्येण तपसा देवा मृत्युमुघ्नत ।**[29]

**सन्दर्भग्रन्थाः**


1. ऋग्वेद- 10/90/12
2. मनुस्मृति 2/28
3. यजुर्वेद 30/5
4. महाभारतम् 72/6/8

5. मैत्रेयोपनिषद् 2/22
6. शतपथ ब्राह्मणम्-3/2/1
7. ऋग्वेद-6/103/1
8. गोपथ ब्रह्मणम् 2/33
9. छान्दोगयोपनिषद्-7/26/2
10. अथर्ववेद 12/3/20
11. ऐतरेय ब्राह्मणम् 33/4
12. गोतम् धर्म सूत्रम् 11/1
13. शतपथ ब्राह्मणम्-5/11/1/12
14. तथैव- 4/1/4/6
15. तथैव 13/2/2/5
16. वाल्मीकीय रामायणः 4/18/20-21
17. ऐतरेय ब्राह्मणम् 8/26
18. तथैव 13/6
19. ताण्डय ब्राह्मणम्- 37/7
20. सायणभाष्य सहित ऐतरेय ब्रह्मणम्2/3
21. ऋग्वेद-10/90/12
22. वायुपुराणम् 1/8/158
23. ताण्डय ब्राह्मणम् 6/1/11
24. महाभारतम् 13/164/2-3
25. आपस्तम्ब धर्मसूत्रम् 2/5/11/10-11
26. शूद्राज इन ऐन्श्येष्ट इन्डिया, पृष्ठ संख्या-80
27. ऐतरेय ब्राह्मणम्-8/1, कौषीतकी ब्राह्मणम्-12/13
28. ऐतरेय ब्राह्मणम् 33/6
29. अथर्ववेदः 11/5/19